# संस्कृत-वार्ता:

**दिनाङ्क:-09/10/2023**
**प्रात : 06:55**

### इजराइल-उपवेशनम्

संयुक्तराष्ट्रे इजराइलेदेशस्य राजदूतेन फलीस्तीन-इस्लामिक-समूहे हमासइत्येतस्मिन् युद्धारोपा: आरोपिता:। शपथवचनमपि स्वीकृतम् यत् हमासस्य आतंकीसंरचनाया: ध्वंससमय आगत: इति यतोहि ह्य: संयुक्तराष्ट्र-परिषदा संघर्षे चर्चा कुर्वता उपवेशनमेकं आहूतम्। गजाइत्यस्य फलीस्तीनिय क्षेत्रे समारब्धे आक्रमणे हमास-आतंकवादिभि: इजराइल-नगरेषु आक्रमणं कृतम् यस्मिन् सप्तशताधिक: जना: मारिता:। न्यूयॉर्के पञ्चदशसदस्यी-सुरक्षा-परिषद: उपवेशनात् पूर्व इजराइलस्य राजदूत: गिलैड एर्डन: प्रावोचत् यत् युद्धोऽयं अपराधयुक्तो अस्ति। अवधेयं वर्तते यत् इजराइलदेशेन ह्य: गजाइत्यस्मिन् आक्रमणं कृतम्। प्रत्युत्तरे कार्याचरणे सहस्राधिका: जना: तत्र मारिता:। केन्द्रीय-विदेश-राज्य-मन्त्री वी. मुरलीधरन: इजराइलदेशे संकटग्रस्तै: भारतीयजनै: निवेदितवान् यत् यदि साहाय्यम् अपेक्षितम् अस्ति चेत् ते भारतीय-दूतावासेन सम्पर्कं साधयन्तु। असौ केरलस्य कोच्चि नगरे वार्ताहरान् सम्बोधयन् आसीत्।

## इजराइल प्रधन्मन्त्री-बाइडेन

इजराइलेदशीय: प्रधानमन्त्री बिंजामिन नेतन्याहू ह्य: अमेरिकी-राष्ट्रपितना जो. बाइडेनेन सह वार्ता कृतवान्। अत्रावसरे अमेरिकीयराष्ट्रपति: देशंप्रति स्पष्टरूपेण समर्थन प्रख्यापितवान्। इत:पूर्वं प्रधानमन्त्री नेतन्याहू: यूक्रेनदेशीयेन राष्ट्रपतिना ब्लादिमीर-जेलेंस्की इत्यनेन इटलीदेशीयेन प्रधानमन्त्रिणा जियोर्जिया मेलोनी इत्येनेन ब्रिटेनदेशीयेन प्रधनामन्त्रिण ऋषिसुनेकेन च सहापि वार्ता: विहितवान्। इजराइलदेशस्य प्रधानमन्त्री बिंजामिन नेतन्याहू: बाइडेनंप्रति स्पष्ट समर्थनाय धन्यवाद: प्रदत्तवान्।

### विमान सेवा स्थगनम्

एयर-इंडिया-इत्येन विमानेन अस्यमासस्य चतुदर्श दिनांक यावत् तल्अवीव इत्यत्र गम्यमाना विमान सेवा स्थगिता। एकस्मिन् सामाजिक अन्तर्जाल संदेशे एयरइण्डिया इति विमान सेवा ह्य: उक्तवती यत् तल्-अवीव् इत्यत्र गम्यमाना: सम्पूर्ण-विमान सेवा: यात्रिणां, विमान-सेवा-दलस्य कार्यकतृणां सुरक्षा दृष्टया सम्प्रति चतुर्दश दिनांक यावत् स्थगिता: जाता: ध्येय यत् ह्य: हमास आतंकवादिभि: इजराईल देशे आक्रमणं कृतं आसीत्।

### रक्षामन्त्री

रक्षामन्त्री राजनाथसिंह: अद्य आरभ्य अस्य मास्य द्वादशदिनांकं यावत् इटली फ्रासयो: यात्रायां भविष्यति। यात्राया: प्रथमे चरणे श्रीसिंह: इटली-देशस्य रक्षामन्त्रिझा ा गाइडो-क्रिसेटो इत्यनेन सम्मेलनं करिष्यति। अस्मिन् वर्षे मार्चमासे इटलीदेशस्य प्रधानमन्त्रिण: भारत-यात्रा-वधौ उभयो: देशयो: मध्ये सम्पर्काणां सीमा रणनीतिक-सहभागितां संवर्धिता । यात्राया: द्वितीयचरणे श्रीसिंह: पेरिसनगरे फ्रांसस्य रक्षामन्त्रिणा सेब्सटियन-लेकोर्नो इत्यनेन सह पञ्चमां वार्षिकरक्षा -वार्तां करिष्यति। उभौ देशौ साम्प्रतिके समये रणनीतिक-सहभागिताया: पञ्चविंशतितम् वार्षिकोत्सवं आमानितवन्तौ।

**आईसीसी**

आईसीसी इति पुरुषस्य क्रिकेट विश्व-चषक-प्रतिस्पर्धायां भारतेन स्वीय प्रथमाप्रतिस्पर्धायाम् आस्ट्रेलियादेश: षड्धावनांकै: पराजित:। चेन्नईनगरस्य एम.ए. चिदम्बरम् क्रीडांगणे ह्य:। ऑस्टेलियादेशने प्रद्त्तान् द्विशतं धावनांकान् अनुसरणं कृत्वा भारतेन स्वीय प्रतिस्पर्धा विजिता। के.एल. राहुल: प्रतिस्पर्धाया: सर्वश्रेष्ठ क्रीडक: चयनित:।

**।। इति वार्ता: ।।**